International Journal of Sanskrit Research 2020; 6(5): 390-392

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 390-392
© 2020 IJSR
www.anantaajournal.com
Received: 06-07-2020
Accepted: 19-08-2020

**डा0 रंजन कुमार पाण्डेय**
सहायक आचार्य (संस्कृत), प0 तारकेश्वर ब्रजनंदन शारदा संस्कृत महाविद्यालय कोचस (रोहतास) बिहार, भारत

**Corresponding Author:**
**डा0 रंजन कुमार पाण्डेय**
सहायक आचार्य (संस्कृत), प0 तारकेश्वर ब्रजनंदन शारदा संस्कृत महाविद्यालय कोचस (रोहतास) बिहार, भारत

# उपनिषद्वाङ्मये ब्रह्म चिन्तनम

**डा0 रंजन कुमार पाण्डेय**

**प्रस्तावना**

वेदाः भारतीयानां ज्ञानविज्ञानस्य केन्द्रम्। तेषां महत्त्वपूर्णां स्थलानां विस्तारः उपनिषत्सु अभवन्। आत्मविद्यायाः ब्रह्मविद्यायाः आदीनां रहस्यानाम् उपनिषत्सु सुविवेचनमभवत्। अद्यत्वे भौतिकवादयुगे सर्वत्र अशान्तिरेव दृश्यते न तु शान्तिः। इयं शान्तिः उपनिषदम् श्रवणेन, मननेन निदिध्यासनेन सम्भवमस्ति अतः जीवने परमं शान्तिम् प्राप्तुम् उपनिषदः शरणं गन्तुम् अत्यावश्यकम्। उपनिषदुक्तेन ज्ञानेन मानवः शोकमोहात् निवृत्तभूत्वा शाश्वतीं शान्तिं प्राप्तनोति। ''तरति शोकमात्मवित् तत्र को मोहः कः शोकः। एकत्वमनुपश्यतः ज्ञात्वा शिवं शान्तिमत्यन्तमेति।''[1] प्रसिद्धः जर्मनदार्शनिकः शोपेनहावरः अकथयत्–उपनिषदः मम जीवने शान्तिसाधनानि अभवन् मृत्यौ अपि शान्तिसाधनानि भविष्यन्ति।[2]

उपनिषदः व्यक्तौ ब्रह्माण्डे च उभयोः विद्यमानं वास्तविकं सत्यं प्रकटयन्ति। परम् इदं सत्यं ज्ञातुं असौ समर्थः भवेत् यस्य मनसि दृढ़संकल्पेन सह तेषाम् अध्ययने लग्नः अस्तु। उपनिषद् शब्दस्य अर्थः एव अस्ति उप+नि+षद्= समीपं तिष्ठनम् अर्थात् सा विद्या या गुरोः सामीप्येन शिक्षयते। शंकराचार्यः कठोपनिषदः भूमिकायाम् अकथयत् यत् षद्लृ विशरणगत्यवसादनेषु धातोः पूर्वात् उप+नि उपसर्गौ अन्ततः च क्विप् प्रत्ययात् उपनिषद् शब्दः निष्पन्नः भवति अर्थात् उपनिषद्यते प्राप्यते ब्रह्मात्मभावोऽनया इति उपनिषद्। यया परिशीलेन संसारस्य कारणभूता अविद्या नशयति, गर्भवासदि दुखात् मोक्षः भवति परब्रह्म च प्राप्यते तत् नाम् उपनिषद्। अमरकोशे[4] उपनिषद् शब्दः गूढ़धर्मे रहसि च अर्थे प्रयुक्तः अस्ति–धर्मे रहस्युपनिषत् स्यात्।

उपनिषत्तत्त्वद्रष्टाणां समक्षे जीवनस्य जगतः च सम्बन्धिनः अत्यन्तगूढ़ाः रहस्यपूर्णाः अनेका प्रश्नाः आसन् येषु विचारविनिमयस्य हेतोः मनसा वाचा कर्मणा समर्पितानाम् अनेकानां शिष्यानाम् आवश्यकता आसीत्। अतैव निजाचार्यकुलेषु ते सदा ईदृशानां शिष्याणाम् आमन्त्रिताः अकुर्वन्–आमायन्तु ब्रह्मचारिणः स्वाहा। वियायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा।[5] (तैत्तिरीय0 1.4)

गुरुभिः सह शिष्याः यत् चिन्तनं मननं विचारविश्लेषणम् अकरोत् तस्य फलं तानि उपनिषदः सन्ति। उपनिषत्सु मुख्यरूपेण ब्रह्मणः स्वरूपस्य प्रतिपादनमस्ति। उपनिषत्सु ब्रह्मणः द्वयोः रूपयोः सगुणब्रह्मणः निर्गुणब्रह्मणः च वर्णनमस्ति। ईशोपनिषदि[6] तत् ब्रह्म अकायम्, अव्रणम्, अस्नाविरम् कथ्यते। अतः ब्रह्मणः निर्गुणरूपस्य वर्णनमस्ति। न तस्य शरीरमस्ति, न तस्य इन्द्रियाणि सन्ति। न तस्य नसनाड्यः सन्ति अतः तत् निर्गुणम्। किन्तु अनेकेषु उपनिषत्सु इन्द्रियाणां गुणान् तस्य एव गुणाः मन्यन्ते यतः इन्द्रियेभिः कृतानां सर्वाणि कार्याणि तत् ब्रह्म निजशक्त्या सरलतया सहजतया सम्पन्नं करोति अतः तत् ब्रह्म सगुणमस्ति। केनोपनिषदि[7] ऋषिः कथयति यत् तत् ब्रह्म श्रोतस्य श्रोत्रं, मनसः मनः वाचः वाचं, प्राणस्य प्राणः, चक्षुषः चक्षुरस्ति। श्वेताश्वतरोपनिषदि[8] तु स्पष्टरूपेण ब्रह्म आदिपुरूषः कथ्यते। स बिना पाणिनागृहणाति, बिना पादेन गतिशीलः, चक्षुषा बिना पश्यति, बिना कर्णेन श्रृणोति। स सर्वं जानाति तस्य ज्ञाता कोऽपि नास्ति। एतेन स्पष्टम् यत् मानवः यानि सर्वाणि कार्याणि निज इन्द्रियैः करोति तानि सर्वाणि कार्याणि ब्रह्म बिना इन्द्रियैः पूर्णतया सहजतया सम्पन्नं करोति। उपनिषत्सु ब्रह्म अस्थूलम्, अनणु, अह्रस्वम्, अदीर्घम्, रसरहितं, गन्धरहितम्, चक्षुरहितम्, श्रोत्ररहितम वर्णितम्। तत् नित्यं, अनादि, अनन्तम्।[9] उपनिषदानुसारेण ब्रह्म सर्वव्यापकमस्ति। तत् ब्रह्म सम्पूर्णजगति व्याप्तम्। तत् सर्वभूतेषु, विद्यमानम् कर्मनियन्ता, साक्षी, चेतनम्, अद्वितीयं, निराकारं, बृहद्, दिव्यम्, अचिन्त्यम्, सूक्ष्मात् सूक्ष्मं, दूरात् दूरं, समीपं, शरीररहितं, महान्, विभुम् अस्ति।[10] अतः स्पष्टम् यत् ब्रह्म मूलतः निराकारं, निर्गुणमस्ति किन्तु सृष्टेः माध्यमेन तत् ब्रह्म साकारं सगुणं प्रतीयते।

उपनिषदानुसारेण तत् ब्रह्म सृष्टेः कर्ता अस्ति। सृष्ट्यादौ तत् एकमेव असीत्। तस्य ईक्षणेन सृष्टेः रचना अभवत्। सृष्ट्यान्ते अपि सर्वम् तस्मिन्नेव लीनं भविष्यति।[11] सृष्टेः सर्वाणि कार्याणि ब्रह्मणा एव गतिं प्राप्नुवन्ति। तत्र न इन्द्रियाणां न मनसः न वाण्याः नैव बुद्धेः गतिः याति।

सर्वाणि इन्द्रियाणि ब्रह्मशक्त्या निज कार्याणि कर्तुं समर्थाः भवन्ति[12]। ज्ञानस्वरूपं ब्रह्मैव सर्वेषाम् आदिकरणं जनिता अस्ति तस्य जनिता कोऽपि नास्ति[13]।

ब्रह्म समस्तजीवानां कर्मणां अनन्तब्रह्माण्डे च घटितानां सर्वघटनानां ज्ञाता। तत् जन्ममृत्युरूपी संसारचक्रे जीवान् तेषां कर्मानुसारेण बध्नाति, पालनं करोति बन्धनात् च मोक्ष्यति[14]। जीवः शुभाशुभकर्माणां फलमवश्यमेव लभते। शुभकर्मभिः पुण्यः अशुभकर्मभिः दुखं भवति।[15]। उपनिषदानुसारेण तत् ब्रह्म अंगुष्ठमात्रम् सर्वभूतेषु हृदयरूपीगुहायां निहितोऽस्ति। तत् भूतभव्यस्य ईशानोऽस्ति।[16] उपनिषदाम् ऋषयः परब्रह्म आत्मानं च एकत्वं पश्यन्ति। ते कथयन्ति– 'अयमात्मा, इदममृतम्, इदं ब्रह्म, इदं सर्वम्[17] तद् ब्रह्म, तद् अमृतम्, स आत्मा[18] ऐतदात्म्यमिदं सर्वम्, स आत्मा तत्त्वमसि[19] कोऽयं आत्मा एष ब्रह्म[20] तदेतद् अक्षरं ब्रह्म तमेव एकं जानथ आत्मानम्[21] ते परब्रह्मणः जगति प्रकटं विराटं स्वरूपमपि पश्यन्ति[22]। उपनिषत्सु ऋषयः यथा परब्रह्म आत्मनं च एकत्वम् अपश्यन् तथैव ते ब्रह्मणि ब्रह्माण्डे च एकत्वस्य दर्शनम् अकुर्वन्। ते अतीव मनोहारिणा दृष्टान्तेन व्यक्तौ, सृष्टौ ब्रह्माण्डे च विद्यमानं एकत्वं अववोधयितुं सुन्दरं प्रयासम् अकुर्वन्। कठोपनिषदि[23] इदम् एकत्वं भावं अग्निना वायुना च दृष्टान्तेन् वर्णितम्। यथा एकः अग्निः निराकारं रूपे सम्पूणब्रिह्माण्डे व्याप्तमस्ति तस्मिन् कोऽपि न भेदः किन्तु यदा स प्रज्वलति तदा वस्तुनाम् अनुरूपे आकारं गृहणाति तथैव एकं परब्रह्म समस्त प्राणिषु समभावेन व्याप्तम् तथापि तत् विभिन्न प्राणिषु तेषाम् प्राणिनामनुरूपं विभिन्न रूपेषु प्रकाश्यते। बृहदारण्यकोपनिषदि[24] इदं एकत्वं रथनेमिना दृष्टान्तेन, सैन्धवखिल्येन दृष्टान्तेन[25], प्रश्नोपनिषदि[26] मुण्डकोपनिषदि[27] च नदीसमुद्रेन दृष्टान्तेन वर्णितम्।

ऋषयः मानवस्य अन्तरात्मनि, ब्रह्मणि, ब्रह्माण्डे च एकत्वम् अनुसन्धानं कुर्वन्तः ब्रह्मणं एकं परमसत्यं रूपं साक्षात्कारम् अकुर्वन्। सर्वानि उपनिषदः तस्य सत्यस्य साक्षिणः सन्ति। केनोपनिषदि[28] अकथयत् यत् मानवः ब्रह्मणः साक्षात्कारणाय सत्यं जीवनम् अनुभवेत्। तत् ब्रह्म तपसा, धैर्येण, ब्रह्मचर्येण, श्रद्धया, विद्यया च लभते[29]। दुश्चरित्रः अशान्तमनः प्राण तं न लभते। अयं आत्मा प्रवचनेन, मेधया बहुना श्रुतेन अपि न लभ्यः। एष यं वुणुते तेनैव लभ्यः[30]। मानवः स्वसंकल्पशक्तिं सत्येन सह युक्त्वा एव ब्रह्म अनुभूतं बुद्धिं प्राप्नुयात्। उपनिषदानुसारेण मानवजीवनस्य मुख्य लक्ष्यं ब्रह्म साक्षात्कारमस्ति तं बिना जीवनं निरर्थकम्।

अतः स्पष्टम् यत् उपनिषदाम् मुख्यं विषयं ब्रह्मविवेचनमस्ति। ब्रह्म एकं चेतनं तत्त्वं यत् मनुष्यस्य हृदि स्थितोऽस्ति। सृष्टेः रूपे तत् साकारं सगुण दृश्यते। मानवस्य शरीरं ब्रह्मणः आधारमस्ति परन्तु मानवस्य इन्द्रियाणि बहिर्मुख्यः सन्ति अतः मनुष्यः इन्द्रियाणि तेषां विषयान् निवृत्त्य मनसा सह युञ्जेत् तत्पश्चात् शुद्ध मनः बुद्धेः सह निरुद्धेत्। तत्पश्चात् दृढ़सकल्पेन बुद्धया आत्मानं, दर्शनं कुर्यात् तदा स ब्रह्म साक्षात्कारं करोति। ब्रह्म ज्ञात्वा मानवः शाश्वतीं शान्तिं प्राप्नोति। आत्मनः मूलस्वरूपं शान्तिमयं, शुद्धम्, पवित्रम्। ब्रह्मसाक्षात्कारस्य मानवस्य कृते, भौतिकसुखानि नगण्यानि भवन्ति अत स परम सुखं शान्तिं च प्राप्नोति। अतः शरीरे विद्यमाने आत्मानं आनन्दमये ब्रह्मणि कथम् प्रतिष्ठापयेत् एतत् एव उपनिषद्।

## सन्दर्भ


1. कल्याण, उपनिषद् अंक, पृ0 17
2. डा0 कपिलदेव द्विवेदी, वैदिक साहित्य एवं संस्कृति पृ0 174
3. कठ उपनिषद् शांकर भाष्य की प्रस्तावना
4. अमरकोश
5. तैत्तिरीयोपनिषद् 1.4
6. सपर्यगाच्छुक्रमकायब्रणमस्नाविरं शुद्धमपापविद्धम्।
   कविर्मनीषी परिभूः स्वयम्भूर्याथातश्यऽर्थान्
   व्यदधाच्छाश्वतीभ्यः समाभ्यः।। ईशोपनिषद् 8
   श्रोत्रस्य श्रोत्रं मनसो मनो
   यद्वाचो ह वाचं स उ प्राणस्य प्राणः।
   चक्षुवश्चक्षुरतिमुच्य धीराः
   प्रेत्यास्माद् लोकादमृता भवन्ति।। केनोपनिषद् 1.2
7. अपाणिपादो जवनो ग्रहीता
   पश्यत्यक्षुः स श्रृणोत्यकर्णः।
   स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
   तमाहुरग्रयं पुरूषं महान्तम्।। श्वेताश्वतरोपनिषद् 3.19
   अस्थूलम् अनणु, अह्रस्वम्, अदीर्घम्
   अरसम् अगन्धम्, अचक्षुष्कम् अश्रोत्रम्
   अस्मिन् न खल्वरे गार्गिः आकाश ओतश्च प्रोतश्च
   बृहदारण्यकोपनिषद् 3.8.8–11
   अशब्दमस्पर्शमरूपमव्ययम्
   तथारसं नित्यमगन्धवच्च यत्।
   अनाद्यनन्तं महतः परं ध्रुवम्
   निचाय्य तक्रमृत्युमुखात् प्रमुच्यते।। कठोपनिषद् 1.3.15
8. सर्वं खल्विदं ब्रह्म। छान्दोग्योपनिषद् 3.14.1
   एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
   कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।।
   श्वेताश्वतरोपनिषद् 6.11
   दिव्या ह्यमूर्तः पुरूषः सबाह्याभ्यन्तरो ह्यजः।
   अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः।। मुण्डकोपनिषद् 2.1.2
9. आसीनो दूरं ब्रजति शयानो याति सर्वतः।
   अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्।
   महान्तं विभुमात्मानं मत्वा धीरो न शोचति कठोपनिषद् 1.2.21–22
   बृहच्च तत् दिव्यमचिन्त्यरूपम्
   सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।
   दूरात् सुदूरे तदिहान्तके चः
   पश्यत्स्विहैव निहितं गुहायाम्।। मुण्डकोपनिषद् 1.1.7
   सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्वैक
   आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम् तस्मादसतः
   सज्जायत। छान्दोग्योपनिषद् 6.2.1
   या इदमेक एवाग्र आसीत्। नान्यात्किञ्चनमिषत्
   स ईक्षत लोकान्नु सृजा इति। ऐतरेयोपनिषद् 1.1
   स विश्वकृद् विश्वविदात्मयोनिर्ज्ञः
   कालकालो गुणी सर्वविद् यः।
   प्रधान क्षेत्रज्ञपतिर्गुणेश
   संसारमोक्षस्थितिबन्धहेतुः।। श्वेताश्वेतरोपनिषद् 6.16
   ततः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढ़म्।
   विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति।। वही 3.7
   यस्मात् परं नापरमस्ति किंचिद् यस्मान्नाणीयो न
   ज्यायोऽस्ति कश्चित्।
   वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं
   पूर्ण पुरुषेण सर्वम्।। वही 3.9
10. न तत्र चक्षुर्गच्छति न वाग्गच्छति
    न मनो न विद्यो न विजानीमो
    यथौतदनुशिष्यादन्यदेव
    तद्विदितादथो अविदितादधि केनोपनिषद् 1.3
    यद्वाचानभ्युदितं येन वागभ्युद्यते
    तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते वही 1.4–8
11. स कारणं करणाधिपाधिपो न चास्य कश्चित् जनिता
    न चाधिपः, श्वेताश्वतरोपनिषद् 6.9
    एतस्माज्जायते प्राणो मनः सर्वेन्द्रयाणि च
    खं वायुज्योतिरापः पृथिवी विश्वस्य धारिणी। मुण्डकोपनिषद् 2.13
12. योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
    स्थाणुमन्येऽनुसंयाति यथाकर्म यथाश्रुतम्।। कठोपनिषद् 2.2.7
    श्वेताश्वेतरोपनिषद् 6.16
13. पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेन।
    बृहदारण्यकोपनिषद 3.12.13

अयमात्मा सितासितै कर्मफलैः सदसद् योनिमापद्यते।
मैत्रायणी उपनिषद 3.1
सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते।
ऐतरेयोपनिषद् 2.1.4
14. अंगुष्ठमात्रः पुरूषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सत एतद्वै तत्।।
अंगुष्ठमात्रः पुरूषो ज्योतिरिवधूमकः।
ईशानो भूतभव्यस्य न ततो विजुगुप्सत एतद्वै तत्।।
कठोपनिषद् 2.1.12–13
मुण्डकोपनिषद् 1.1.7
हृदि अन्तर्ज्योतिः पुरूषः बृहदारण्यकोपनिषद् 4.3.7
15. बृहदारण्यकोपनिषद् 2.5.1
16. छान्दोग्योपनिषद् 8.14.1
17. छान्दोग्योपनिषद् 6.8.7
18. ऐतरयोपनिषद् 3.1.1, 3.1.3
19. मुण्डकोपनिषद् 2.2.2, 2.2.5
20. त्वं स्त्री, त्वं पुमानसि त्वं कुमार उत वा कुमारी
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः
नीलः पतंगो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः
समुद्राः अनादिमत्त्वं विभुत्वेन वर्तसे यतो
जातानि भुवनानि विश्वा। श्वेताश्वतरोपनिषद् 4.3–4
विश्वतश्चक्षुरूत विश्वतोमुखो विश्वतो बाहुरूत विश्वतस्पात्
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः
श्वेताश्वतरोपनिषद् 3.4
21. अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव
एकस्तथा सर्वभूतान्तरात्मा
रूपो रूपो प्रतिरूपो बहिश्च। कठोपनिषद् 2.2
वायुर्यथैको भुवनं प्रविष्ठो
रूपं रूपं प्रतिरूपो बभूव
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च।। कठोपनिषद् 2.2.10
22. यथोर्णनाभिः सृजते गृह्यते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरूषात्केशलोमानि
तथाक्षरात्सम्भवतीह विश्वम्। मुण्डकोपनिषद् 1.1.7
23. स वा अयमात्मा सर्वेषां भूतानामधितिः सर्वेषां भूतानां
राजा तद् यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः
एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे
लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पितः।।
वृहदारण्यकोपनिषद् 2.5.15
24. स यथा सैन्धवखिल्य उदके प्राप्त उदकयेवानु
विलीयते न हास्योद्ग्रहणायेव स्यात्। यतो यतस्
त्याददीत लवणम् एवैवं वा अर इदं महद्भूतम् अनन्तम्
अपारं विज्ञानधन एव। बृहदारण्यकोपनिषद् 2.4.12
यथा विलीनमेवांगास्यान्तादाचामेति। कथमिति। लवण–
मिति। मध्यादाचामेति। कथमेति लवणमित्यान्तादाचामेति।
कथमिति लवणमित्यभिप्राश्यैनदथ मोपसीदथा इति।
तद्ध तथा चकार तच्छश्वत् संवर्तते तं होवाचात्र वाव
किल तत् सोम्य न निभालयसेऽत्रैव किलेति।
छान्दोग्योपनिषद् 6.13.2
25. स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं
गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते।
एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरूषायणाः पुरूषं
प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरूष इत्येवं
प्रोच्यते। स एषोऽकलोऽमृतो भवति तदेष लोकः।
प्रश्नोपनिषद् 6.5
26. यथा नद्य स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान नामरूपाद्विमुक्तः परात्परं पुरूषमुपैति दिव्यम्।।
मुण्डकोपनिषद् 3.2.8
27. इह चेदलेदीदथ सत्यमस्ति, न चेदिहावेदीन्महती
विनिष्टः। केनोपनिषद् 2.5
28. विद्यया विन्दतेऽमृतम् तपसा चीयते ब्रह्म। मुण्डकोपनिषद् 1.1.8
अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विदायात्मानम–
न्विष्यादित्याभिजयन्ते। प्रश्नोपनिषद् 1.10
अस्तीत्येवोपलब्धरूपस्तत्त्वभावेन चोभयोः
कठोपनिषद् 2.3.13
तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्य येषु सत्यं
प्रतिष्ठितम्। प्रश्नोपनिषद् 1.15
29. नाविरतो दुश्चरितान्नाशान्तो नासमाहितः
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्
कठोपनिषद् 1.1.24
नायमात्मा प्रवचेन लभ्यो
न मेधया न बहुना श्रुतेन
यमैवष वृणुते तेन लभ्य–
स्तस्यैज आत्मा विवृणुते तनूंस्वाम्
मुण्डकोपनिषद् 3.2.3 कठोपनिषद् 1.2.23
यस्तु विज्ञानवान् भवति समनस्क सदा शुद्धिः
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते।। वही 1.38
दृश्यते त्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः। वही 1.3.12